ॐ

# ॥ ताम्रपर्णी-पुष्कर-अनुष्ठान-सङ्कल्पः ॥

**श्री-काञ्ची-कामकोटि-पीठाधीश्वराणां श्रीशङ्कराचार्य-स्वामिनाम् आज्ञया प्रकाशितः**

(आचम्य ।) शुक्लाम्बरधरं + शान्तये । (प्राणानायम्य सङ्कल्पं करोति ।)

तदेव लग्नं + अङ्घ्रियुगं स्मरामि । अपवित्रः पवित्रो + शुचिः । मानसं + न संशयः । श्रीराम राम राम । तिथिर्विष्णुः + जगत् । श्रीहरे गोविन्द गोविन्द गोविन्द । ममोपात्त-समस्त-दुरित-क्षय-द्वारा श्रीपरमेश्वर-प्रीत्यर्थम् –

भगवतः नारायणस्य परमेश्वरस्य अचिन्त्यया अपरिमितया शक्त्या ध्रियमाणस्य महाजलौघस्य मध्ये परिभ्रमताम् अनेक-कोटि-ब्रह्माण्डानाम् एकतमे चतुर्दश-भुवनान्तर्गते भू-मण्डले सप्त-द्वीप-मध्ये जम्बू-द्वीपे नव-वर्ष-मध्ये भारत-वर्षे नव-खण्ड-मध्ये भरत-खण्डे हिमाचल-कैलास-विन्ध्याचलादि-अनेक-पुण्य-शैल-शिखरिते दण्डकारण्य-विन्ध्यारण्य-वेदारण्यादि-अनेक-पुण्यारण्य-वनश्री-भास्वरे अस्मिन् भारत-देशे प्रवहन्तीनां प्रियाः मातर इव पयसा प्रजाः पुष्णतीनां नदीनाम् अन्यतमायां **ताम्रपर्णी-नाम्न्याम्** –

1. द्रविडेषु मलयपर्वत-अन्तर्गते अगस्त्याचले सम्भूतायां तिरुच्चॆन्दूर्-इति-विख्यात-सुगन्धशैल-समुल्लसित-सन्धि-क्षेत्र-समीपे समुद्रं प्राप्नुवत्याम्,
2. पराम्बिका-कण्ठ-स्थित-मालात्मिकायां, तया पार्वत्यै विवाह-काले अनुगृहीतायां, पार्वत्या च परमेश्वर-कण्ठे अर्पितायां, तत्काल-सञ्जात-भूवैषम्य-परिहाराय परमेश्वरेण आज्ञप्ताय अगस्त्य-मुनि-वराय प्रसादितायां, तद्धस्त-गते च सुमनोहर-कन्या-रूपेण परिणतायां,
3. अगस्त्येन स्वेन साकं दक्षिण-देशम् आनीय मलय-पर्वत-राजाय दुहितृत्वेन प्रतिपादितायां, तत्पर्वत-अन्तर्गते गुप्तिशृङ्गे पराम्बिकायाः सन्निधेः "प्रवहस्व

महानदि” इति भगवत्या स्वयं प्रशस्य चोदितायां,

4. त्रिकूट[*१]-पर्वते स्व-मणि-च्छायायाः चित्रा[२]-नाम्नीम् उपनदीं, सर्व-काम-घटनां घटना-नाम्नीं च उद्भावितवत्याम्, अम्बिकांश-भूतया श्याम-नद्या[३] वरुण-पाश-शक्ति-स्वरूपिण्या पाशवती[४]-नद्या च संयुक्तायां,
5. हयग्रीवेण सर्व-देवता-नदी-स्वरूपतया अभिष्टुतायां, गङ्गा-देव्या “अहं मलय-जाताऽस्मि” इति स्व-अभिन्नतया अभिनन्दितायां,
6. दक्षिण-काञ्ची इति प्रथिते शालिवाटीश्वर[५]-क्षेत्रे अगस्त्येन पूजितायां, देव-गन्धर्वादि-क्षिप्त-पुष्पवती[६] इति प्रसिद्धायां, यम-धर्म-राजेन स-मूर्धाञ्जलि प्रार्थित-सर्वतो-रक्षायां, कल्कि-अवतार-देशतया अभिमतायां,
7. पापनाश-क्षेत्रे स्वयं शिवं पूजितवत्यां, त्रिकूट-गिरौ शिवस्य चित्र-सभया, शालिवाटीश्वर-समीपे ताम्र-सभया च मण्डितायां, सुब्रह्मण्य-प्रतिष्ठापित-लिङ्गेन अनादि-सिद्धेन ज्योतिर्वनेन[७], पुटार्जुन[८]-काश्यपेश्वर[९]-गोष्ठीश्वर[१०]-प्रभृतिभिः, “नव-कैलास”-संज्ञकैः इति अनेकैः शिव-क्षेत्रैः विभूषितायां,
8. सृष्टेः पूर्वोत्तरं ब्रह्मणा विष्णोः आराधनस्य नादकमल[११]-श्रीवैकुण्ठ-क्षेत्राभ्यां, विनिद्र-तिन्त्रिणी-वृक्षतया लक्ष्मणस्य तपसः, विष्णोः गार्हस्थ्य-आचरणस्य च रमापुरेण[१२], गजेन्द्र-मोक्ष-क्षेत्रेण[१३], विष्णु-वनेन[१४], कृष्ण-तडागेन[१५], “नव-तिरुपति”-संज्ञकैः इति अनेकैः विष्णु-क्षेत्रैः विराजितायां,
9. त्रिपुर-संहारात् परं बाणात्मकस्य विष्णोः[१६], असुरैः सह युद्धात् परं दुर्गायाश्च[१७] ताप-शमन्यां, सनक-वामदेव-शङ्ख-रोमशादीनाम् ऋषीणां प्रमोद-शिवधर्म-काञ्चनमालिनी-प्रभृतीनां च महात्मनां तपःसिद्धि-प्रदायाम्,

---

* १ कुट्रालम्, २ चित्तारु, ३ पच्चैयारु, ४ कयत्तारु, ५ तिरुनेल्वेलि, ६ सिन्दुपून्दुरै, ७ सेवल्, ८ तिरुप्पुडैमरुदूर्, ९ अम्बासमुद्रम्, १० ऊर्क्काडु, ११ चेरन्मादेवि, १२ तिरुनगरि, १३ अत्ताफनल्लूर्, १४ सीवलप्पेरि, १५ करुङ्कुळम्, १६ कारैयार् बाणतीर्थम्, १७ कारुक्कुरिच्चि

10. विष्णोः सुदर्शनस्य, ब्रह्मणो दण्डस्य, चन्द्रस्य, हाहा-हूहू-मुखानां गन्धर्वाणां, महर्षेः दुर्वाससः, विप्र-वधू-कुमारादीनां, वसुमनो-मानसाङ्क-प्रभृतीनां राज्ञां, व्यास-प्रार्थनया गङ्गादि-नदीनामपि च नाना-विध-दोष-निवृत्ति-प्रदायां,

11. प्रथमानुग्रहत्वेन कुन्तला-नाम्न्याः भर्तारम् उज्जीवितवत्याम्, एवं कशावती-देवलेखा-प्रभृतीनामपि सौमङ्गल्य-प्रदायां, नन्दिकेश्वर-मातुः शाप-निवृत्त्या शिव-भक्ताग्रेसर-पुत्र-प्रदायां, देवमातुः अदितेः पुत्र-सौभाग्य-प्रदायां,

— एवमादि-बहु-गुण-विशेषण-विशिष्टायाम् अस्यां **ताम्रपर्णी-महानद्याम्** —

समस्त-हरि-हर-देवता-गुरुचरण-श्रोत्रिय-सन्निधौ —

ब्रह्मणः द्वितीय-परार्धे श्वेतवराह-कल्पे प्रथमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे अह्नि द्वितीये यामे तृतीये मुहूर्ते सप्तमे वैवस्वत-मन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये विलम्ब** -नाम-संवत्सरे दक्षिणायने वर्ष-ऋतौ कन्या-आश्वयुज-मासे शुक्ल-पक्षे चतुर्थ्यां शुभ-तिथौ भार्गव-वासर-युक्तायां विशाखा-नक्षत्र-युक्तायां प्रीति-योग-वणिजा-करण-युक्तायां (नवरात्र-पुण्यकाले),

कावेरी-पुष्करोत्तरं, **वृश्चिकं गते देव-गुरौ बृहस्पतौ** पुष्कर-पुण्य-काले —

अस्माकं सर्वेषां महाजनानां क्षेम-स्थैर्य-वीर्य-विजय-आयुः-आरोग्य-ऐश्वर्याणाम् अभिवृद्ध्यर्थं, धर्म-अर्थ-काम-मोक्ष-रूप-चतुर्विध-पुरुषार्थ-सिद्ध्यर्थम्, इष्ट-काम्य-सिद्ध्यर्थं, जनानां धर्मैक-श्रद्धा-प्रवृत्ति-उभय-सिद्ध्यर्थं दुराचार-निवृत्ति-पूर्वक-सदाचार-सम्पत्त्यर्थं, तेन अतिवृष्टि-अनावृष्टि-राहित्येन पर्याप्त-वृष्ट्या वापी-कूपादि-जलाशयानां सम्पूर्त्यर्थम्, उपनदी-सहितासु ताम्रपर्णी-कावेरी-पिनाकिनी-तुङ्गभद्रा-कृष्णा-गोदावरी-प्रभृतिषु सम्यक्-प्रवाह-सिद्ध्यर्थं, जनानां जल-सम्पदः सम्यग्-विनियोगे श्रद्धायाः उदयार्थं, परिसर-प्रदूषण-परिहारेण पृथिव्याः

---

**अधोरेखाङ्कितानि पदानि तत्तद्दिनपञ्चाङ्गानुसारं यथोचितं विपरिणमयत ।

ताप-शान्त्यर्थं, तद्द्वारा देशेऽस्मिन् सर्व-धान्यानाम्, औषधादि-गुणयुक्तानां सस्यानां, छाया-फलादि-प्रदानां वृक्षाणां च समृद्ध्यर्थं, गवादीनां बहुक्षीरादि-प्रदत्वार्थम्, अनेन सर्वेण एतद्-देश-निवासिनां सुख-शान्त-जीवन-सिद्ध्यर्थम् –

1. भगवतो बृहस्पतेः पुण्य-काल-प्रयोजक-सङ्क्रमण-कर्तुः

देवानां च ऋषीणां च गुरुं काञ्चन-सन्निभम् ।
बुद्धि-भूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥

इति प्रणुतस्य,

2. तत्-प्रार्थनया ब्रह्मणः कमण्डलोः आगत्य,

यदा राशि-प्रवेशः स्यात् तदा-प्रभृति सर्वदा ।
द्वादशाह-मिते काले वस्तव्यं तु ममाज्ञया ॥
आवत्सरं तु वस्तव्यं मध्याह्ने द्वि-मुहूर्तकम् ।
अन्ते द्वादश वस्तव्यं दिनानि च यथासुखम् ॥

इति ब्रह्मणो निदेशेन नद्याम् अस्यां वसतः सार्ध-त्रिकोटि-तीर्थ-सहितस्य पुष्कर-राजस्य च,

3. तेन संयुतायाश्च **भगवत्याः ताम्रपर्ण्याः**

नमस्ते देवि कल्याणि महा-पातक-नाशिनि ।
ताम्रपर्णि त्वयि स्नास्ये पाहि मां भव-सागरात् ॥
मलयाचल-सम्भूते मलयानिल-सोदरे ।
मरुद्वृधे महाभागे मङ्गलानि प्रयच्छ मे ॥

इत्यादिना प्रार्थितायाः –

पूजां, तदनु स्नानं, तदनु यथाशक्ति विहितानि दानानि, अन्यानि च धर्म-कार्याणि यथासम्भवं करिष्ये ॥

-o-